✧˖°*❋ ❋*°˖✧

# શનિ વજ્રપંજર કવચમ્

# Shani Vajrapanjara Kavacham
## in gujarati

✧˖°*❋ ❋*°˖✧

# ॥ શનિ વજ્રપંજર કવચમ્ ॥

નીલાંબરો નીલવપુઃ કિરીટી
ગૃધ્રસ્થિતાસ્ત્રકરો ધનુષ્માન્ ।
ચતુર્ભુજઃ સૂર્યસુતઃ પ્રસન્નઃ
સદા મમસ્યાદ્વરદઃ પ્રશાંતઃ ॥

**બ્રહ્મા ઉવાચ ।**

શૃણુધ્વં ઋષયઃ સર્વે શનિ પીડાહરં મહત્ ।
કવચં શનિરાજસ્ય સૌરૈરિદમનુત્તમમ્ ॥

કવચં દેવતાવાસં વજ્ર પંજર સંંગકમ્ ।
શનૈશ્ચર પ્રીતિકરં સર્વસૌભાગ્યદાયકમ્ ॥

અથ શ્રી શનિ વજ્ર પંજર કવચમ્ ।

ઓં શ્રી શનૈશ્ચરઃ પાતુ ભાલં મે સૂર્યનંદનઃ ।
નેત્રે છાયાત્મજઃ પાતુ પાતુ કર્ણૌ યમાનુજઃ ॥ 1 ॥

નાસાં વૈવસ્વતઃ પાતુ મુખં મે ભાસ્કરઃ સદા ।
સ્નિગ્ધકંઠશ્ચ મે કંઠં ભુજૌ પાતુ મહાભુજઃ ॥ 2 ॥

સ્કંધૌ પાતુ શનિશ્ચૈવ કરૌ પાતુ શુભપ્રદઃ ।
વક્ષઃ પાતુ યમભ્રાતા કુક્ષિં પાત્વસિતસ્તથા ॥ 3 ॥

નાભિં ગ્રહપતિઃ પાતુ મંદઃ પાતુ કટિં તથા ।
ઊરૂ મમાંતકઃ પાતુ યમો જાનુયુગં તથા ॥ 4 ॥

પાદૌ મંદગતિઃ પાતુ સર્વાંગં પાતુ પિપ્પલઃ ।
અંગોપાંગાનિ સર્વાણિ રક્ષેન્ મે સૂર્યનંદનઃ ॥ 5 ॥

## ફલશ્રુતિઃ

ઇત્યેતત્કવચં દિવ્યં પઠેત્સૂર્યસુતસ્ય યઃ ।
ન તસ્ય જાયતે પીડા પ્રીતો ભવતિ સૂર્યજઃ ॥

વ્યયજન્મદ્વિતીયસ્થો મૃત્યુસ્થાનગતોપિવા ।
કલત્રસ્થો ગતોવાપિ સુપ્રીતસ્તુ સદા શનિઃ ॥

અષ્ટમસ્થો સૂર્યસુતે વ્યયે જન્મદ્વિતીયગે ।
કવચં પઠતે નિત્યં ન પીડા જાયતે ક્વચિત્ ॥

ઇત્યેતત્કવચં દિવ્યં સૌરેર્યન્નિર્મિતં પુરા ।
દ્વાદશાષ્ટમજન્મસ્થદોષાન્નાશયતે સદા ।
જન્મલગ્નસ્થિતાન્ દોષાન્ સર્વાન્નાશયતે પ્રભુઃ ॥

**ઇતિ શ્રી બ્રહ્માંડપુરાણે બ્રહ્મનારદસંવાદે શનિવજ્રપંજર કવચં સંપૂર્ણમ્ ॥**

✧.......°*❋ ❋*°.......✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net